हि० हे

१

श्रीगणेशाय नमः ॥ एतावता प्रबंधेन परिष्कृतं हेतुं निरूप्य तत्प्रसंगात् तत्तुल्यनिर्णेयाहितरूपतत्कार्यकारित्वा
द्धेत्वाभासनिरूपणं प्रतिजानीते अथेति ॥ अनुमितीति यथार्थानुमितिहेतुहेत्वाभासानां लक्षणं न दुष्टत्वं च दु
ष्टहेतूनां तद्भिन्नापेक्षयोपाधेयसंकरेपीत्यादि वक्ष्यति तत्रानुमितिपदमनुमितिलिंगकार्यतानिरूप
कसंबंधित्वेनानुमितित्वावच्छिन्नपरं साध्यव्याप्यहेतुमान् पक्षः पक्षः साध्यवानित्याकारानुमितिपरं
वा तेन ह्रदकत्वहेतौ व्यभिचारादिदुष्टहेतावपि अव्याप्यपरामर्शादनुमितिसत्त्वादेन व्यभिचारात् व्याप्यत्वादिज्ञाने
साध्यव्याप्तिमत्त्वाच्च व्यभिचारादिदुष्टाभावव्याप्यानुमित्यजनकत्वेपि न क्षतिरिति वदंति ॥ पर्वतेति अत्र
वह्निः धूमो वह्नेः अभिधेयत्वं वा प्रमेयत्वस्य व्यभिचारीत्यादिभ्रमादप्यनुमितिप्रतिबंधादाह
यथार्थेति ननु प्रतिबंधकज्ञानविषयव्यभिचारादिघटकसाध्यादेरपि प्रत्येकं हेत्वाभासत्वापत्तिः १

अथ विशिष्टविषयकं ज्ञानं प्रतिबंधकं न तु टंकेचन विशिष्टमितिचेन्न तर्हि यथार्थेति व्यर्थं भ्रमवि
षयविशिष्टस्याप्रसिद्धत्वादित्यनुशयेनाह यद्विति केचित्तु दुष्टानामेव हेतूनामेतानि लक्ष्याणि
न त्वनुमितीयमिव प्रथमप्रमापिसाध्याभावव्यभिचारादेः प्रतिबंधकत्वमभ्युपेयम् तद्धर्मवत्तादृशाभाव
प्रतियोगिनो ये व्यभिचारादयस्तत्प्रकारकयथार्थज्ञानविषयत्वं अत एव न त्वपि स्वस्य चेत्तुल्यम
र्थः आद्यस्यैव बाधदुष्टत्वलक्षणत्वमिति प्राहुः यद्विषयत्वेनेति लिंगत्वमविवक्षितं यद्विषयत्वे
न यादृशविशिष्टविषयत्वेन तेनानुमितिप्रतिबंधकपक्षविशेष्यकभ्रमविषये साध्याभावादौ
सद्धेतु निष्ठेनातिप्रसंगः अवच्छेदकत्वं चेहानतिरिक्तवृत्तित्वं तेन विशिष्टस्यासत्वेपि भ्रमात्र
त्वादि

क्रो० हे

२ त्तिबंधेपि न क्षतिः विशेषणतायां च नाह्रदाविशिष्टान्यत्वघटितत्वेन तेन प्रमेयत्वादिविशिष्टे सव्यभि
चारादौ नातिप्रसंगः एवं च पक्षतावच्छेदकादिविरहविशिष्टः पक्षः पक्षनिष्ठस्तद्विरहो वा सा
ध्याभाववद्वृत्तिसाधनं साधनवद्वृत्तिसाध्याभावो वा हेतुदोषो येन केनापि संबंधेन तद्वत्त्वप्र
कृत हेतुदुष्टः यादृशधर्मिणि यादृशसाध्यधर्मवत्ताज्ञानमनुमितिप्रतिबंधकं तस्य धर्मिणः तादृ
शधर्मवत्त्वं हेतुदोषः यद्यपि कश्चिन्न आपपर्वतत्वेन पक्षत्वे वह्नित्वेन साध्यत्वे विशिष्टधूमत्वे
न च हेतुत्वे पर्वतादेः कांचनमयत्वविरहेदृशस्य वह्निभ्रमस्य हेतुपर्वते तस्य महानसीयवह्निधूम धूम
विरहितं प्रमेयत्वस्य केवलधूमस्य वा वह्निव्यभिचारे विशिष्टधूमस्य वा पर्वतीयवह्निव्यभिचा २

रो न दोषः यथा तत्संबंधेन तत्र तस्य हेतोर्दुष्टत्वं ज्ञतत्त्वतद्धर्मावच्छिन्नतत्सम्बन्धकतद्धर्मावच्छिन्नत
त्साध्यकतद्धर्मावच्छिन्नतद्धेतुकानुमितिप्रतिबंधकं वाच्यं तथा च निर्वह्निः पर्वतो वह्निमान् पर्वता
वृत्तिवह्निमान् वा न व्यभिचारितः पर्वतावृत्तेर्वा धूमादित्यादौ न कोऽपि हेत्वाभासः स्यात् तादृशा
नुमितेरप्रसिद्धत्वादिति अत्र वदंति यद्विषयकनिश्चयस्य विरोधिविषयताप्रयुक्तः तद्धेतोर
नुमितौ वा आहार्यभिन्नतज्ज्ञाने वा पक्षतावच्छेदकविशिष्टे पक्षे साध्यतावच्छेदकविशिष्टसा
ध्यवैशिष्ट्यावगाहित्वस्य साध्यतावच्छेदकविशिष्टसाध्यनिरूपितव्याप्तिविशिष्टहेतुतावच्छेदक
विशिष्टहेतुमत्तावगाहित्वस्य च तद्द्वयोर्व्यतिरेकसत्त्वं हेतुदोषत्वं पक्षतावच्छेदकवैशिष्ट्यं च वै
कालिकं नतु वास्तवं ग्राह्यं व्याप्तिश्चान्वयतो व्यतिरेकतश्च वाच्या तादृशावगाहित्वस्य [illegible] प्रसि

शिहे

३ द्विराहार्यत्सागरवोपगंतव्याअन्यथानतिकत्वात् एवंच वस्तुमात्रनिश्चयानंतरं निर्वह्नित्वविशिष्टवह्ने
रग्रहेपिनक्षतिः तस्यविरोध्यविषयत्वात् एवंसाध्यनिश्चयोत्तरंनस्यात्नानुमितावपि मानसत्वाना
विरोधित्वाच्च तादृशपक्षेतादृशसाध्यवैशिष्ट्यस्यतादृशसाध्यनिरूपितव्याप्तिविशिष्टतादृशहे
तुवैशिष्ट्यस्यचावगाहिनोज्ञानस्ययद्विषयकंज्ञानंविरोधिविषयकंतत्वं तादृशज्ञानविरोधित्वं
वाहेत्वाभासत्वं ज्ञानविरोधित्वंचतद्विषयविषयकग्रहविरोधिग्रहविषयत्वं एवंविधंवर्तितह
नात्रेसव्यभिचारलक्षणाद्यावनुसर्तव्येतिकेचित् केचित्तुयादृशपक्षकयादृशसाध्यकयादृशा
हेतौयावंतोदोषाःसंभवंतितावदन्यान्यत्वं एकमात्रदोषस्थलेचतत्वमेवहेत्वाभासत्वं सव्याति
रिक्तएवान्योन्याभाववृत्तित्वैयर्थ्यं पंचविधभेदोक्तिस्तुतत्संभवस्थलाभिप्रायेण व्यभिचारादेः ३

साध्यादिभेदनियंत्रितत्वाद्धूमाभेदमात्रस्य चाकिंचित्करत्वादित्याहुः स्यादेतत् शब्दोऽनित्यः श-
ब्दत्वादित्यत्रासाधारणोऽव्याप्तिः सर्वसाध्यवद्व्यावृत्तेस्तत्रासत्त्वात् एवं शब्दोऽनित्यः कृतकत्वादि-
त्यत्र सत्प्रतिपक्षे नित्यत्वव्याप्याद्रव्य द्रव्यत्वादावपि पक्षस्य तद्धेतौ विरहादित्याशंकां तयोरल-
क्ष्यत्वेन निराकुरुते दृष्टान्तविशेषवृत्ति हेत्वोः सद्धेत्वोः असाधारणः पक्षमात्रवृत्तिः सत्प्रतिपक्षो
विरोधिपरामर्शविषयस्तत्तथा तयोर्दृष्टान्तविशेषे हेतौ सर्वसाध्यवद्व्यावृत्तत्वस्य पक्षे साध्याभावव्या-
प्यवत्त्वस्य च परामर्शयोराभासत्वात् अनुमित्यजनकत्वात् तद्धेतुः हेत्वादौ साध्यवद्व्यावृत्तत्वादि-
बुद्धेः प्रतिबंधकत्वं परमाथाति न तु तद्विषयस्य दोषत्वं असत्वात् अन्यथा बाधभ्रमेणानुमित्य-
नुदयात्तस्यापि दोषत्वापत्तिः कोटिसाध्याभाववद्व्याप्यवत्ताभ्रमयोरनुमितिविरोधित्वे विशेषः

शि॰ हे॰
४

निर्युक्तिक वस्तुप्रवाहोनन्वेऽप्यनुमितिभावः यज्ज्ञानस्य यदनुमितिप्रतिबंधकता यद्वैशिष्ट्यं तद्दुष्टं
ज्ञानस्य कारकप्रमाविषयत्वं लक्षणार्थः नन्वस्तु हि विधं विषयरूपं साधारण्यादि बाधश्च प्रमितसाध्या
भाववान् पक्षः तद्विषयत्वेन ज्ञानस्यानुमितिप्रतिबंधकत्वात् अविषयत्वं च विरोधिसामग्रीकालीन
त्वादि न दुष्टं च ज्ञानस्यैव तद्विषयस्य हेतोरपीति नन्न तद्दुष्टं हि हेतोः नाभेदेन बाधेन तदभावात् अतएव
वदात्र यत्तथा वन्हिव्यभिचारिद्रव्यत्वादिमति धूमे व्याप्तिप्रसंगाच्च साध्याभाववत्त्वस्यैव साध्याभाववद्
वृत्ति हेतोर्ज्ञानस्य प्रतिबंधकत्वात् साधारण्यादिविषयत्वस्य ज्ञाननिष्ठस्यैव प्रतिबंधकतावच्छेदक
त्वात् सत्तादिसाध्यके च ज्ञाने व्याप्तिप्रसंगाच्च यथा कथंचित् दुष्टत्वस्य व्याप्तिप्रसंजनकत्वात् विरोधि
सामग्रीसमवहितोऽपि च लिंगपरामर्शो न स्वसाध्यकानुमितेः प्रतिबंधकोऽप्रतिसमवहितो वन्हिरिव ४

दाहस्य व्यापकवह्न्यभावविशिष्टज्ञानेनास्य पक्षस्यानुमितिप्रतिबंधः तदैवात्र प्रतिबंधकतावच्छेदकमुक्तं भव
ति च प्रतिबंधकीभूतविरोधिसामग्रीकालीनत्वादिविशिष्टपरामर्शत्वेनेति चेन्न कालादिसाधारणाकार
णाघटितसामग्रीकापि प्रतिबंधिकाविशेषणत्वत्र तत्सत्त्वे कार्योत्पादस्य दुर्वारत्वात् किंतु विरोधिपरा
मर्शत्वमपि यदि च तत्सत्त्वेपि तत्साध्यकाधावत्ताज्ञानानुमितिप्रतिबंधः प्रामाणिकः तदाऽप्रामाण्यग्र
हाभावस्यैव तदभावव्याप्यवैशिष्ट्यं तत्र निवेश्यतां यथाग्रमग्रमासाधारणाविरोधिपरामर्शसत्त्वेनानु
मितिः तथा तथाविधबाधादिग्रहेपीत्यतिप्रसंगः प्रचानीनादौ लिंगे विरोधिपरामर्शकालीनत्वमिति।
पक्षपि यद्विषयत्वेन ज्ञानस्य प्रतिबंधकत्वं तद्रूपत्वमेव वाच्यं सत्प्रतिपक्षे च विरोधिव्याप्त्यादिकमेव तथा
तद्रूपमपि हेतौ स्वसमानाधिकरणसंबंधेन तस्य समूहालंबनतया हेतुदूषणविषयत्वादिति तदपि तुच्छं सा

ध्याभाववत्त्वस्यहेतुविषयत्वेनसाध्याभाववत्त्वस्यज्ञानप्रामाण्यविषयत्वेनवाज्ञानस्यप्रतिबंधकत्वंनस्याच्च
साध्याभाववत्त्वस्यापिपक्षेसंभवादितिव्याप्तिः विशिष्टविषयत्वेनप्रतिबंधकत्वंविशिष्टंचतत्राप्रसिद्धमि
तिचेत् नतर्हिसर्वत्रसत्प्रतिपक्षेसाध्याभावव्याप्यवान्पक्षःप्रसिद्धः यथाकथंचित्संबंधेनतादृशं
चेतिप्रसंगं धूमादेरपिज्ञानरूपेणतत्संबद्धयापन्नप्रत्यक्षादिनावासंबंधेनवह्निचापादिसत्त्वात् ता
दृशासंबंधावगाहित्वेज्ञानस्यप्रतिबंधकत्वेनतद्दूत्वंचनसर्वत्रप्रतिपक्षितेहेतावितिचकृचि
त्सिद्धसाधितिकृतेपक्षविवेन यद्यपीति स्यादयुत्वाभाववत्त्वव्याप्यकपाहेत्वनिश्चयेस्यादयु
त्वप्रत्यक्षाभावद्वीवोधयोरनुदयात् नचैवंनरशिरःकपालंशुचिप्राण्यंगत्वात्इत्यादिनाव्याप्ति
मविरोधःस्यात् तत्रानुकूलतर्काभावेनबलवत्त्वाभावविरोधेनचव्याप्तिनिश्चयस्यानुमितेश्चा ५

नुस्यतेरितिभावः यद्वैतत्साध्यमुच्चयमात्रं प्रत्यक्षंप्रत्यानुमानिकबाधादिनिश्चयस्याप्रतिबंधकत्वेपि
ष्टाद्यंप्रतिप्रतिबंधकत्वात् योग्यताज्ञानेनान्यथासिद्धत्वात्तद्भावोनतत्रहेतुरितिचेन्न एवमप्युपनी
तभानविशेषंप्रतितत्वेन हेत्वाभासद्वैरत्वात् यद्यपिलक्षणतःसामान्यप्रतीतिंविनाविशेषजिज्ञासासा
नुदयात्सामान्यलक्षणानंतरमेवविभागोयुक्तः तथापितद्व्यभिचारपदस्यसाधारणमात्रेप्रसिद्धतया
तन्मात्रस्यलक्ष्यभावंबुध्यमानैरंतेवासिभिःअसाधारणादिसाधारणलक्षणस्यातिव्याप्तिःतद्वारणे
स्यैवसाध्यताप्रतीयेततन्निवारणायलक्ष्यांतरमपिदर्शयतिसव्यभिचारइत्यादि केचित्तुसामान्यतोना
धीनोविभागोनतल्लक्षणप्रत्ययमपेक्षतेअतःप्रथमंविभागकरणेपिनदोषइत्याहुः प्रसक्तिरनुमिति
राप्रतिबंधतदुपधानमव्यापकं व्याप्तिव्यापकंचतथाविधव्याप्तिभ्रमेणसद्धेतावनाप्तयोग्यतावाच्यासाच

तो दृष्टान्तादित्यनेन च विरुद्धोभयावृत्तत्व[redacted]मेकस्य संभवतीत्याह एकस्येति साध्येति कोटिद्वयोपस्था
पकं स साध्यसंदेहजनकं साध्यसंदेहजनककोटिद्वयोपस्थितिजनकमिति भावः तत्र साधारणतया विरुद्धतया वा
नित्यत्वानित्यत्वयोरुपस्थापकस्यानित्यत्वे साध्ये ज्ञानस्यावृत्तत्वख्यापकत्वाभ्यां वह्नितदभावोपस्थापकस्य व
ह्नौ साध्ये धूमस्य च वारणाय जनकान्तं तथोपस्थितेः साध्यसंदेहाजनकत्वात् धर्मितावच्छेदकपुरोवर्तित्वादि
विशिष्टधर्मिज्ञानस्य संशयजनकतया तद्वारणाय कोटिद्वयोपस्थापकेति न चैतदसाधारणतया संग्राह्य
मेवेति वाच्यं तथात्वेपि तदुत्तीर्णतादशायां विशेषदर्शनात्संशयानुपधायकत्वेपि तज्जननयोग्यताया अ
निवृत्तेः अन्यथा यथाकथंपक्षादौ साध्यतदभावनिश्चयदशायां साधारण्याव्याप्तिप्रसंगाच्च प्रतिपक्ष
संकलदशायां हेतुमत्ताज्ञानस्य साध्यसंदेहजनकत्वपक्षे हेतुवारणाय कोटीत्यादि हेतुना साध्यस्य प्र ६

त्ति हेतुनासाध्याभाववस्योपस्थापकत्वादुभयोपस्थापकत्वेन कस्यापीत्यपि कश्चित् इदं द्व्यणुकं नित्यमणु
त्वादित्यादौ साधारणधर्मवद्धर्मिज्ञानस्यैकोट्युपस्थितिसंशयं च प्रति हेतुतया तद्विषये धर्मिणि सद्धेता
वतिप्रसंगस्यादतः पक्षधर्मतेति पक्षपदं धर्मिमात्रपरं नचैवं नित्योघटः शब्दत्वादित्यादौ बाधाद्यवता
रेपि असाधारण्यापत्तिः इष्टत्वात् अन्यथा बाधसिद्ध्योरन्यतरावतारदशायां साधारण्यासंग्रहाप
त्तेः कासिद्धिसंकीर्णत्वेन सव्यभिचारमध्यप्रवेशे सव्यभिचारसंकीर्णतयासिद्धेऽप्यन्तर्भावापत्तौ तद्व्या
तिरिक्तहेत्वाभासतापत्तेः न च व्याप्यविरुद्धयोः साधारण्यभ्रमभावाद्व्याप्तिप्रसंगः धर्मिणि यद्रूपवत्ता
ज्ञानं साध्यसंशयजनकं तद्रूपवत्त्वस्योक्तत्वादिति तथा च रूपं साधारण्यादीति सिद्धान्ते स्फुटीभविष्यति ।
इदं सविषयकमात्मवृत्तित्वाज्ञानत्वादित्यादौ प्रामाण्याप्रामाण्यसंशयस्य तद्घटकीभूतसाध्यतदभा

प्रि॰टी॰
७

वविषयकतया कोट्युपस्थितिरूपस्य तज्जनकीभूतज्ञानविषये ज्ञानत्वेनातिप्रसंगभंगः कापि साधारण
धर्मवत्ताज्ञानस्य तज्जन्यकोट्युपस्थितेर्वा संशयजनकतया तज्ज्ञानस्य तादृशसंशयाहेतुत्वात् अप्रामा
ण्यसंशयस्थले तु ज्ञानत्वलक्षणसमानधर्मदर्शनात् ज्ञाने प्रामाण्यस्य ज्ञानविषयात्मकसाधारणध
र्मदर्शनाच्च विषये तद्वत्त्वस्य संदेहः अप्रामाण्यसंशयाद्यनुधावने तु भ्रमत्वज्ञानस्य विरोधिज्ञा
नस्य प्रतिबंधकतया तदपसारणप्रयुक्तमित्यस्याकारे व्यक्तत्वात् व्याप्यवत्तासंशयस्य च पक्षव्या
प्यकवत्तासंशयहेतुत्वपक्षे ज्ञानपदं निश्चयपरं हेत्वभिमतत्वविशेषणं तु तेन संबंधेन तद्वत्ताज्ञानस्य
संशयाहितजनकतासूचनार्थं तेनात्मत्वकपालत्वादिसाध्यके समवायसंबंधेन हेतौ ज्ञानघटादौ वि
षयत्वसंयोगादिना तत्संदेहजनके नातिप्रसंग इति विप्रतिपत्तौ प्रत्येकं कोटिद्वयोपस्थापकत्वा ७

स्य भावान्तलक्षणोक्तहेतुपदेन तद्ग्रहणात् मिलितस्य तदुपस्थापकत्वेपि न तज्ज्ञानात् तथा न बाधि
लितहेत्वोर्जनकत्वं तथात्वेपि बाधेन संबन्धेन तज्ज्ञानात्तु भयत्र कोट्युपस्थापकं तेन संबन्धेन हे
तुत्वे क्व वैयर्थ्यमत आह व्याप्तिर्यमिति अनुपसंहारिपक्षएवेति अनुपसंहारितादृशायां साध्य
तदभावसहचरितत्वनिर्णयाभावेपि तत्तत्क्रमेण वास्तवतत्सहचरितत्वमादायैव लक्षणस
मन्वय इति भावः केचित्तु व्याप्यादिधर्मेपि साधारण्यज्ञानात् संशयस्योदयात् तद्दशायां वस्तुतः
साधारण्येप्यनुदयात् साधारण्यज्ञानं हेतुः तत्र निश्चयत्वमकिंचित्करं गौरवात् तथाच पक्षेण
व्याप्तिसंशयात्मकतदुभयसाहचर्यज्ञानादेव तथात्वमिति भाव इत्याहुः तच्चिन्त्यं नतु केव

व्याहे
८

लान्वयित्वसाध्यकानुपसंहारित्वसाध्याभावाप्रसिध्यानसंश्रयाभावाद्व्याप्तिः एवं यत्र स्थिरे धर्मि
णि पूर्वं घटत्वं गृहीतं उत्तरं दृष्टान्तां तत्रैव दोषात् घटत्वाग्रहेन दृष्टमित्येव प्रमितिभ्रमेच घटत्वनि
ष्ठय विषयीभवत्वमिति व्यावृत्तत्वेन गृहयामावानवाप्यसाधारणोदृढं तेवस्तुतः व्यावृत्तत्वाभावे
न तत्र तत्सत्तायोग्यादित्वनत्वयोर्लक्ष्यत्वाभावेन परिहरन्ति केवलान्वयीति अत एव यत एव
पुरुषदोषाधीनं तद्दोषत्वमत एव तस्यानित्यदोषत्वं साहजिकदोषत्वे कादाचित्कत्वानुपपत्तिः एवं
च यत्र दोषतावृत्तिजनकं वस्तुतो हेतौ नत्वानित्यदोषत्वमपि यत्र तु पुरुषस्य तद्ग्रहोऽन तत्र न दर्पिगम
भात्रादर्पिदृष्टे भ्रान्तिप्रसंगाद् स्याद् अन्यथेति केचित् परे तु अयं घटः एतत्वादित्यादौ व्याप्तिः ८

साध्यसंदेहप्रयोजकं हि तस्य साध्यतदभाववद्व्यावृत्तत्वं न चैकस्य धर्मस्य तदुभयव्यावृत्तत्वं संभ
वति असाधारण्ये तु तस्य पक्षमात्रवृत्तितया ज्ञानस्यापि लक्ष्यतयोनार्थापत्ति अयं घट इत्यादि ॥
एवं च वृत्तिमत्त्वादिकमेवासाधारण्यं पक्षवृत्तितामात्रमदृशायामसाधारण्यस्यासंकरः सव्योभय
व्यावृत्तत्ववृत्तिमत्त्वयोः स्वरूपतो विरोधः निश्चितसाध्यतदभाववद्व्यावृत्तत्वं च न संदेहप्रयोजकं
तथा सति तुल्यन्यायतया निश्चितसाध्यतदभाववद्वृत्तित्वस्यापि तथात्वे सन्देहे तादृशेपि साध्याभा
ववत्त्वभ्रमविषयवृत्तित्वग्रहदशायामतिप्रसंगात् न च तादृशनिश्चयविषयस्य धर्मिणो
वास्तवं साध्याभाववद्वृत्तित्वमपि तन्त्रं मानाभावात् किं च संदेहजनकतावच्छेदकस्वरूपस्य

श्रीहे

१ विशेषणत्वे व्यभिचारिणि साध्याभाववन्महानसादिवृत्तित्वात् साध्यायाम व्याप्तिः उपलक्षणत्वे
असाधारणोत्तीर्णतादृशसाध्यसमतिव्याप्तिः असाधारणप्रकरणसमयोः नानात्वेन व्यभि
चारयोः अनित्यदोषत्वं विशेषादर्शनदशायां अनुमित्यनुत्पादप्रयोजकत्वं ननु बाध
स्य हेतुदोषत्वं अन्यथा अनुमित्यनुत्पादप्रयोजकज्ञानविषयताभावेन बाधस्य हेतुदो
षत्वमित्याकूतः अनवगतसाध्यसहचारत्वे तु अवगतसाध्याभावसहचारतया विरु
द्धस्यैवत्तयादिति इदं चाभ्युपगमवादेन वस्तुतो निर्णीतलक्षणस्यपक्षत्वव्याप्तिरि १
तिध्येयं यद्रूपसत्त्वमनुमितिप्रतिबंधकं तदेव विभाजकं अन्यथातिप्रसंग इत्यपि

प्रेस्य दूषयन्ति नैतद्धिति यत्तु तत्तदुपस्थापकत्वादिज्ञानमनुमितेस्ताऽजनकस्य वा न प्रतिबंधकं वि
रोधित्वविषयत्वाभावात् एवमनुमानेऽपि पक्षवृत्तित्वे सतीति विरोधित्वं विरोधिज्ञानविषयत्वं अथवा
वृत्तिपदमत्यंतायोगव्यवच्छेदार्थकं तेन संयोगसंबंधेन व्यभिचारिणि द्रव्ये हेतौ व्यभिचाराभाववदशा
यां नाप्रसंगः साध्यवद्वृत्तित्वं तु नासाधारण इति हृदयं अपक्षधर्मधूमादिवारणाय सत्यंतं पक्षः सं
दिग्धसाध्यो धर्मी विशिष्टहेतौ तद्वृत्तित्वग्रहाविरोधित्वं तु नदर्पः तथा च पक्षतावच्छेदकरूपेण पक्षे
साध्यतावच्छेदकरूपेण साध्यस्य हेतुतावच्छेदकरूपेण हेतौ वोधयत्नज्ञानेन तद्विरोधित्वस्य लाभात् पक्ष
साध्यसाधनाप्रसिद्धिस्वरूपासिद्धिवाधप्रतिरोधानां निरासो सिद्धिसंकीर्णसंग्रहश्च विरोधोपि फलतः
प्रतिरोध एव तदन्यत्वेन वा विरोधिविशेषणीयं वक्ष्यति च सिद्धांते विरुद्धान्येति हेतुसाध्यसामानाधिक

द्वि॰हे॰

१० रूपग्रहाविरोध्यर्थकसंबंधपदत्वेनप्रकृतहेतुसंबंधितयाविरोधित्वेनास्यार्थोपवर्णनेनप्रायशो बाधादिवा
रणोपिघटत्वमनित्यंघटत्वादित्यादिबाधादिवारणं प्रयत्नसाध्यमिवतस्यातिभाति वस्तुतस्तु अनुमितिपदं तत्क
रणतापरं आश्रयासिद्ध्यादिवारणायसत्वेन तादृशपक्षकतादृशहेतुग्रहाविरोध्यर्थकं अन्यथाचबा
धेऽसंगत्याव्याप्तिग्रहविरोधित्वमेवाभिधित्सितं तेनवह्निमान्वह्निमान्ह्रदइत्यादौहेतोःसाध्यवद्वृत्तित्वादेः
नासंग्रहः विवेचयिष्यते चेदमुपरिष्टात् सपक्षेतिसंपाताबाधानां अतएवचानुपदंविरुद्धोपीत्यादिकंवक्ष्य
ति अर्थेति विशेषणं पक्षवृत्तित्वं साध्यव्याप्यत्वञ्चेति हेत्वाभासत्वं हेतुवदाभासमानत्वं तस्यार्थश्चाव
गतिमत्त्वं एवंचसाध्यतदभावव्याप्यत्वग्रहविरोधिवृत्तिमत्त्वग्रहाविरोधिरूपवत्त्वमित्यर्थः साध्यतद
भाववद्वृत्तित्वसाधारण्यं निष्कृष्टसाध्यतदभाववद्वृत्तित्वसाधारण्यं तच्चव्याप्तिद्वयग्रहवि १०

रोधीति हृदयं असिद्धिविरोधस्तु अवृत्तित्वं वृत्तिमत्त्वग्रहविरोधि साध्यवद्भाववद्व्यावृत्तस्य
मपि यद्वीहृष्टान्तान्तः असिद्धिरेव नोचेदिदमेवासाधारण्यं बोध्यं साध्याप्रसिध्यादिधारणा
यविशिष्टसाध्यसाधनग्रहाविरोधित्वं वाच्यं व्यापकसामानाधिकरण्यमिह व्याप्यत्वं तेन द्वितीं
यस्यभेदः रीतिस्तु तुल्यैव केचित्तु असाधारण्याभावकालावच्छिन्नसाध्यवद्भाववद्व्याप्तिरूपस्य
त्वं विवक्षितं विशेषणाभावादुक्तो व्याप्यस्य चिह्नस्य चासाधारणस्य संग्रहस्स्यात् इत्तस्थि
तं धर्मेति विरोधादेवार्थकं साध्याभावेत्यादि ग्रन्थं तस्य पार्थक्ये प्रमाणाभावादिति भावः॥
प्रथमेत्यादि अनन्तमित्यादि च दूषणं यथाश्रुते नापीत्यादि सपक्षविपक्षत्वावच्छिन्नव्या

शिहे

११ वृत्तित्वं सर्वत्र व्याप्यवृत्तित्वं अर्थेति पक्षागतत्वविशेषणव्यावृत्तत्वयोर्दूषकताबीजमनुपयोगादिति भा
वः पक्षातिरिक्तेत्यादि साध्यविरुद्धयोरसाधारणयोः संग्रहाय पक्षातिरिक्तपदे पक्षत्वं संदि
ग्धसाध्यधर्मत्वं धूमेत्यादिदूषणं यथाश्रुतेन तु सपक्षीभसभासा स्वपक्षातिरिक्ते वर्त्तते यत्र सा
ध्यवत्मात्रवृत्ति साध्याभाववन्मात्रवृत्ति च तद्भिन्नत्वमित्यर्थ इति ध्येयं पक्षवृत्तीत्यादि
विरोधः सामानाधिकरण्यं पक्षवृत्तित्वसाध्यसामानाधिकरण्यग्रहाविरोधी योऽनुमितेरो
धैकस्य ज्ञानकत्वान्विषयस्य संबंधस्य सपक्षसत्त्वादेरभावस्तद्धेतुत्वमित्यर्थः सपक्षविप
क्षव्यावृत्तत्वस्य चासाधारण्यस्य निष्कर्षे पक्षे साभानाधिकरण्यसंदेहान्नतस्यानैकान्तमवि ११

न्तेधित्वं पक्षवृत्तित्वे तौ विरुद्धमित्येव वर्त्तते यस्माद्दूषकाभावः न ह्येव मित्यर्थ इत्यपि कश्चित् पूर्वोक्तलक्ष
णानां यथोक्तरीत्या व्याप्यत्वं नाव्याप्त्यादिर्दोषावकाशः परं तु तत्तज्ज्ञानस्यानुमितिप्रतिबंधकतया तेषां हेत्वा
भासतावच्छेदकत्वं न घटते न घटतां किं तेन तेषां हेत्वाभासविभागमात्रोपयोगित्वादित्याशय वा
ना हेतुर्व्यभिचारी इति संदेहं प्रत्येव साधारण्यादिविशिष्टधर्मवद्धर्मिज्ञानत्वेन हेतुता न तु जनककोटिद्व
योपस्थितिं प्रति तु तादृशधर्मज्ञानत्वमात्रेणेत्यभिप्रेत्याह उभयेति साध्यसंदेहजनकेति प्रकृतं
यथा कथंचित्कोटिद्वयोपस्थितिः स्यादनुभवसाधारणी संदेहजननी नियामकं तु साधारण्यवि
शिष्टधर्मवत्ताज्ञानं अत एव धारावाहिकः संदेह इति मन्तेन तु धर्मितावच्छेदकविशिष्टधर्मि

त्रिाहे

१२ रितयद्रूपविशिष्टधर्मज्ञानं साध्यसंदेहजनकं तद्रूपवत्त्वमेव वक्तव्यं कोटिद्वयसहचरितत्वादिना
ज्ञानस्योपपत्तेस्तादृशधर्मिविशिष्टज्ञानमेव संदेहजनकमनुगतश्चानीसाहचर्यादिज्ञानमपेक्ष्यानुवृत्ति
नयेनतु यद्रूपविशिष्टत्वेन गृहीतधर्मस्य धर्मिवृत्तिताज्ञानं तथात्वद्रूपत्वमेव वाच्यं तच्चेत्यादि ननु अ
साधारणत्वं न साध्यवदभाववद्व्यावृत्तत्वं वृत्तिमत्त्वलक्षणत्वासंभवात् एककोटिव्याप्यस्येव एकको
टिमद्व्यावृत्तस्यापि धर्मस्य बुद्धेर्विशेषदर्शनतया संशयविरोधित्वाच्च सत्प्रतिपक्षेऽपि परामर्शप्रा
माण्यसंशयोत्तरमेव साध्यसंदेहात् नापि निश्चितसाध्यवदभाववद्व्यावृत्तत्वं तद्धि यत्र यत्र साध्या
दिमत्तानिश्चयः तद्व्यावृत्तत्वं येन येन रूपेण यत्र तन्निश्चयः तेन तेन रूपेण तद्व्यावृत्तत्वं वा आद्ये १२

सर्वेषां साध्यव्याप्यवत्त्वे साध्यवत्त्वे सर्वेषां वा साध्यवत्त्वे प्रमेयाणां स्यादिनिश्चये सामान्यतः पक्षेपि साध्या-
दिनिश्चयाद् तथात्वप्रसंगः द्वितीये तु विशिष्टपक्षे साध्यनिश्चयं विनैव शब्दादिना साध्यव्याप्यत्वनिश्च-
येपि तथात्वापत्तेः नैष दोषो यादृशव्याप्तिग्रहे सति नासाधारण्यं तद्ग्रहाभावेन विशेषणज्ञानस्य सा-
धारण्याभावविशिष्टस्य तद्ग्रहस्य चाभावेन सामान्यलक्षणस्य विशेषणत्वादिति व्याप्तिनिरासात् वि-
शिष्टाभावादेव च साधारणे व्याप्तिभ्रमदशायां व्याप्तिरिति चेत् एवं सत्येकेन व्याप्तौ गृहीतायां अ-
साधारण्यस्य न किंचित्स्यादिति सव्यभिचारित्वं स्यात् स्याद्वा तदपि न तत्तु रूपघटितमसाधारण्यं चेत्
साध्यादिव्याप्यवत्त्वेन रूपेण साध्यादिमत्त्वनिश्चयेप्यव्याप्तिप्रसंगाच्च न हि घटोक्तनिश्चयो घटा

व्या॰हे
१३ व्यावृत्तं प्राकृतत्वमिति वदन्ति स्वत्वव्याप्यवतो व्यावृत्तं प्राकृतत्वमिति तदानीं निष्प्रयोजनमभिहितं च निश्चित
साध्यतदभाववद्व्यावृत्तत्वं न संशयप्रयोजकमिति किं तु साध्यतदभावाभ्यां सहचरितत्वमेव त
त्सहचरिताभावप्रतियोगित्वं व्याप्यविरुद्धयोस्तु तत्त्वेन निश्चितयोर्दर्शने विशेषदर्शनवशादेव न
संशय इति विभाव्य लक्षणान्तरमाह विरुद्धस्येति विशिष्टसाध्यहेतुसामानाधिकरण्यग्रहाविरो
धत्वार्थतो विरोधिविशेषणं तेन साध्यसाधनयोरप्रसिद्धिरवृत्तित्वस्य परस्परसामानाधिक
रण्यादीनां च व्युदासः पक्षपदं च धर्मिमात्रपरं तथा च यद्धर्मिवृत्तित्वं हेतोर्ज्ञायते तत्रै
वानुमितिविरोधियद्रूपं तद्वत्त्वमर्थः साध्यव्यापकीभूताभावप्रतियोगित्वं च तथा बाधप्रति १३

रोधीनुधर्मिविशेषितत्वात्तन्मतादृशौ सर्वसाध्याभाववत्तत्वव्याप्यवद्धेत्वादिकं तु साध्यवत्त्वग्रहविरोधित्वे
न साध्याभावाधिकरणत्वग्रहविरोधिसाध्यानुमितिसामान्यविरोधित्वं वा विशेषणं तेनैवेति तेनानुमिति
विरोधिनाविपक्षवृत्तित्वादिना एवकारेणानुगमकं रूपं व्यवच्छिद्यते अस्य हेत्वाभासतावच्छेदकत्वं निर
स्यति हेत्वाभासस्य लक्षणानुरोधेनेति तेनानुमितिविरोधिघटितलक्षणाकरणेन असाधारणस्य
सत्प्रतिपक्षोत्थापकतया दूषणत्वपक्षेनाव्याप्तिरव्यापुनराव्याप्तिरेव साध्याभावज्ञापकत्वेन सा
ध्यासाध्यवत्तानुमितिप्रतिबंधकत्वेन सर्वमनित्यमित्यादि संप्रदायमनुरुध्य चेदं अत एव ना
वच्छेकंताभावपिच्छति नापीति निश्चितसाध्यवति साध्यवद्भिन्नेवर्तमानत्वमित्यर्थः अनुपसंहा

१४ येइति साध्यवदन्यवृत्तित्वांशस्यतत्राप्रसक्तत्वादितिभावः नापीति इहसपक्षत्वेन निश्चयगर्भे अतो नाभेदः
घटइत्यादीस्यस्यविरुद्धस्यानुपसंहार्यस्यप्रसिद्धस्यविरुद्धान्तरस्यव्यवच्छेद्यत्वात् अन्वयतो व्यतिरेकत
श्च सहचारग्रहदशायामीदृशांशित्वमनुपसंहारीतिमतेनेदमित्यपिकश्चित् विपक्षेति अत्रविपक्ष
त्वंसाध्याभाववत्वं अनुपदमेववक्तुगत्यासाध्याभाववद्वृत्तित्वेनसाधारणइतिमूलग्रंथएवस्फुटत
रमभिधानात् ननु निश्चयगर्भे नञ्ज्ञानस्याप्रतिबंधकत्वात् नच वस्तुतोप्यत्रनिश्चयसत्त्ववृत्तित्वज्ञा
नंप्रतिबंधकं हृदांतरेणसाध्याभाववत्तयानिश्चिते हृदांतरेण हेतुसत्वेप्यप्रतिबंधात् नचैकेन
रूपेणतत्तथा गौरवात् हेतुसाध्याभाववयोःसामानाधिकरण्यास्फुरणेनाविरोधात् साध्याभाव १५

वह्निर्हेतुरित्यादिशाब्दज्ञानानामप्रतिबंधकत्वापाताच्च यत्तु साध्याभाववद्वृत्तित्वनिश्चयहेतुपंशीयांशोर्सं
शयसाधारणं साध्याभाववद्वृत्तित्वसामान्यप्रतिबंधकं अन्यथा पक्षस्य साध्याभाववसंदेहेन संदिग्धा
नैकांतिकत्वापत्तेः यद्यप्युक्ते हि पक्षे पक्षसमे च व्यभिचार इति तन्न व्याप्तिनिश्चये हेतौ व्यभिचारसं
शयायोगात् तदनिश्चयदशायां त्वनुकूलतर्काद्युक्तौ संदिग्धानैकांतिकत्वस्येष्टत्वात् हेतुसाध्याभा
वसामानाधिकरण्यावगाहित्वेनैव ज्ञानस्य व्याप्तिग्रहप्रतिबंधकत्वात् अत एव पक्षः साध्यातिरिक्त
पक्षधर्मातिरिक्तधर्मवान् पक्षत्वादित्यादौ अनुकूलतर्कविरहिणो बाधप्रतिरोधयोरनवतारेपि
पक्षत्वसंदिग्धानैकांतिकत्वाप्रयोजकागीयंते एवं वह्निर्दाहानुकूले स्यादयः शक्तिसाधका

व्यि॰टि॰

१५ अपि अन्यथा पक्षातिरिक्ते सर्वत्र साध्यवत्ताभिप्रायात् व्याप्तिग्रहस्य दुर्वारत्वात् पक्षविपक्षान्यतरत्वादि
ना सर्वत्र सत्त्वेऽपि पक्षसंभवाच्च अपक्षसाध्यवत्तद्वृत्त्यंताभावाभावगर्भव्यभिचारयोरेकोपादानेऽनुग
त व्याप्तिः साध्यवत्ताऽज्ञानसाक्षात्प्रतिबंधकज्ञानविषयत्वेनाभाववत्तद्वृत्त्यनुगमेऽपि हेतुमति तादृशा
भाववत्त्वस्य तादृशाभावयति हेतुसत्त्वस्य तादृशाभावे हेतुसामानाधिकरण्यस्य साध्यवत्तद्वृत्तौ हे
तुसामानाधिकरण्यतादृशाभावप्रतियोगित्वादेश्चासंग्रह इति चेदत्र वदंति प्रकृतसाध्यसाधन
सामानाधिकरण्यग्रहाविरोधिनो ज्ञानस्य विषयतया अन्वयव्याप्तिग्रहविरोधितावच्छेदकत्वेन
विभजनान्नासंग्रहः अविरोधिनद्वृत्त्यंतेन साध्याप्रसिद्ध्यादीनां निरासः यदि पुनरत्यंताभावान्यो १९

ष्याभावयोरेकतरगर्भव्यभिचारस्थानस्यान्यतरगर्भव्याप्तिग्रहविरोधित्वमित्यादिकं विभाव्यते तदा
साध्यसामानाधिकरण्यघटितत्वेनान्वयव्याप्तयोरनुगमनीयः प्रातिस्विकरूपेणोपादाने वा
नाव्यव्याप्यत्वग्राहित्वं ग्रहस्य वक्तव्यं साध्याव्यभिचरितसामानाधिकरण्यस्य व्याप्ये प्रसिद्धस्य हेतौ
विरहेऽप्येतदुभयघटकत्व विशिष्टसाधनवत्त्वग्रहाविरोधित्वे सति व्यापकत्वग्रहविरोधि ताव
च्छेदकरूपवत्त्वं वा विभाजकं शेषं पूर्ववत् साध्यतद्धेत्वोरत्यन्ताभावान्योन्याभावौ साध्याभाववद्व्या
प्याहि व्यावृत्तेन साध्यवत्तास्थानविरोधित्वेनानुगमय्य तत्र हेतुसामानाधिकरण्याभावग्रहवि
रोधित्वं साध्यवत्तास्थानविरोधिनिधातादृशाभावग्रहविरोधिहेत्वाभासतावच्छेदकरूपवत्त्वं वान

त्रि॰ हे॰

१८ पावकत्वं साध्याभावव्याप्यादौ हेतुसामानाधिकरण्यादिकमविरोधित्वाभासः विरोधित्वं पूर्वो
क्तदिशावसेयं उपदर्शितविशिष्टव्याप्तिविरहो व्याप्यत्वासिद्धिरेवेति व्याप्तिग्रहकारणासहचा
रग्रहसहकार्यभावप्रतियोगिज्ञानविषयत्वेनानुगम इत्यपि कश्चित् प्राञ्चस्तन्येनोदाहरयन्ति सर्वे
त्वादि सर्वैतिविपक्षे त्वन्वेति तेनसाध्याभावन्यूनवृत्तिव्युदासः विपक्षत्वस्यनिश्चयगर्भत्वात्
भूरतिस्यागंधवत्वात् घाणे नित्यः शब्दत्वादित्यादौ नाव्याप्तिः पृथिवीहृदयवत्तीरसादित्यादौज
लादेर्नीरसत्वादित्यपेपुनरसाधारण्यभ्रमएवेतिमंतव्यं तथापीति पक्षत्वं संदिग्धसाध्यक
त्वं प्राचांमतं दूषयतिकायेत्वादि व्याप्तीत्यादि तथाचस्वतो दूषणत्वासमस्यानाभासत्वमु १८

· तज्ज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यत्वप्रत्यक्षनिष्ठकार्यतायां विषयतयावच्छेदकत्वादिति निर्गलितं ·

विषयनिरूप्यं हि ज्ञानं ज्ञानवित्तिवेद्यो विषयः ॥ विषयनिरूप्यत्वं यदि तज्ज्ञानाधीनग्रहविषयत्वं
तदा कदाचित्स्वदज्ञानाधीनज्ञानविषयस्य घटज्ञानस्य वित्तौ पटस्यानियमतो घटज्ञानवित्तिवेद्य
त्वाभावान्न व्यभिचार इत्यतः तत्तद्विषयकज्ञानत्वावच्छिन्नकारणतात्प्रतियोगिकनिरूपणनिष्ठ
कार्यतायां विषयतयावच्छेदकत्वं विषयनिरूप्यत्वं वाच्यं · तथा चासंभवः विज्ञायितत्तद्विषय
ज्ञानं शब्दादिना ज्ञाननिरूपणादतो निरूप्यपदं साक्षात्कारपरं · ज्ञानवित्तिवेद्यत्वं ज्ञानीययत्किं
चिद्ग्रहविषयत्वं यदा तदाऽनुव्यवसायग्राह्यतासिद्धिः प्रामाण्यानुमित्यादिरूपज्ञानवित्तौ धर्म
धर्मिवैशिष्ट्यानां विषयत्वस्य सर्वैरुपगमादतो ज्ञानवित्तौ नियमतो विषयत्वं तद्वाच्यं · तथा च बाधः
शब्दादिरूपवित्तौ विषयस्याभानादित्यतः वित्तिपदमपि प्रत्यक्षपरं · तथा च घटज्ञाने घटादिविषयतानि